# समष्टिः

(काव्यसङ्कलनम्)

राधावल्लभः त्रिपाठी

प्रकाशकः
देववाणी परिषद्
नवदेहली

प्रथमं संस्करणम्, 2014

सर्वेऽधिकाराः रचयित्र्यधीनाः

*Samaṣṭiḥ* - collection of original Sanskrit Poems with Hindi translation by Radhavallabh Tripathi. I Edition 2014, published by Devvani Parishad, 6, Vani Vihar, New Delhi. © Radhavallabh Tripathi

# अनुक्रमः


कथनम्
1. समष्टिः
2. शब्दालङ्कारः
3. आकाशः
4. धरित्री
5. बीजानि
6. शम्बूकाः
7. शनैः शनैः
8. वार्धक्यम्
9. प्रतीक्षारसः
10. मालवी
11. भवनस्य छदौ वाटिका
12. देवदीपावली
13. प्रस्तरस्थले नगरे
14. देहल्यां मेट्रोयाने
15. वटतरुः
16. नारिकेलम्
17. अधोगमनम्
18. अनिद्रा
19. संस्कृतस्य अगाधे सरसि
20. कोकिलः
21. पण्डितस्य आधुनिकस्य च संवादः
22. मुस्ताक्षतिः

23. न खलु तद्वाच्यं
24. वयम्
25. चायपानकाले
26. हेमबर्गे हिमपातः
27. आतपस्य कोटयः
28. स्नुही
29. नवा नायिका
30. नूतनवर्षमङ्गलम्

★★★

# कथनम्

*सन्धानम्* (1989), *गीतधीवरम्* (1996), *लहरीदशकम्* (1986, 2003), *सम्प्लवः* (2000), *संसरणम्* (2009) इति पूर्वप्रकाशितानां काव्यसङ्ग्रहानां क्रमे *समष्टिः* मम षष्ठं काव्यसङ्कलनम्। *सन्धानम्* इति प्रथमे मदीये काव्यसङ्ग्रहे 1988-क्रि.-वर्षं यावद् विरचिताः कविताः सङ्कलिताः, पञ्चमे *संसरणम्* इत्याख्ये च 2001तः 2009तमं वर्षं यावद् प्रणीताः कविताः। अस्यां *समष्टौ* 2010तमस्य वर्षस्य पश्चात् प्रणीतानि काव्यान्येव सन्ति। विगतेषु चतुर्षु वर्षेषु मया संस्कृते त्रयः उपन्यासाः – *अभिनवशुकसारिका, अन्यच्च, ताण्डवम्* चेति संज्ञप्ताः विरचिताः। संस्कृते प्रणीतानां कथानिकानामपि सङ्कलनं *स्मितरेखे*ति नाम्ना प्रकाशितम्। काव्यरचना तु कादाचित्कतयैव समजायत। किन्तु स्वल्पोऽपि यावान् काव्यराशिरिह समावेशितस्तावता मम भावबोधे अभिव्यक्तिप्रकारे चिन्तनसरणौ च सञ्जातानि परिवर्तनानि तद्गतं वैविध्यं च सुधीभिः गवेषकैश्च बोद्धुं शक्यमिति मन्ये। अत्र साम्प्रतिकसाहित्येन मदीयरचनाधारायाः संवादः सविशेषं परिलक्ष्येत।

*समष्टौ* सङ्कलिताः सर्वाः त्रिंशत्कविताः मत्कृतेनैव हिन्दीभाषा-नुवादेन संयुक्ताः प्राकट्यं प्राप्नुवन्तीति सविशेषं तुष्यामि। इतः पूर्वं मम एक-पञ्चाशत्संस्कृतकवितानां हिन्दीभाषानुवादसङ्ग्रहः *चतुरस्र* इति शीर्षका-न्वितः साहित्याकादेम्या 2006-क्रि.-वर्षे प्रकाशितः, ततः प्राक् तत्पश्चाच्च विभिन्नासु पत्रिकासु मदीयकवितानां हिन्दी-पञ्जाबी-गुजराती-आङ्ग्ली-भाषानुवादाः प्रकाशं याताः, यान्ति स्म च। *लहरीदशकस्य* द्वितीये संस्करणे दशानामपि लहरीकाव्यानां हिन्दीगद्यानुवादो योजितः। अस्य सङ्ग्रहस्य मूलकाव्यानि तेषां मदुपज्ञा अनुवादाश्च संस्कृतहिन्दीसाहित्ययोः पारस्परिकतां प्रगुणितां विधास्यन्तीति मन्ये।

देववाणीपरिषत्प्रवर्तकानां संस्कृतसेवाव्रतिनां कृतिनां पद्मश्री- महाकवि - रमाकान्तशुक्लवर्याणामनुग्रहेण समष्टिः प्रकाशमायाति, तान् प्रति हार्दिकीं कृतवेदितां विज्ञापयामि। आचार्यो भागीरथिः नन्दः समष्टेः मुद्रितमातृकासंशोधने महत्साहाय्यं व्यदधात्, सोऽपि सर्वथा मम धन्यवादानां पात्रम्।

इयं समष्टिः समेषां सुधियां प्रीतिपात्रं स्यादित्याशासे।

राधावल्लभः

# समष्टिः

कति कति वीचयः
परस्परं हस्ताहस्ति घट्टिताः
कति आवर्ताः आम्रेडिताः
कति विवर्ता विनिर्मिताः
समेषामेतेषां समष्ट्या
कदाचित्क्वचित् विरचितः -
बुद्बुद एकः।

बुद्बुदस्य जीवनमेव कियत्
वीचीनामावर्तानां विवर्तानां समष्टौ
बुद्बुदो बुभूषति
परन्तु भवति वा न भवति वा
भवत्यपि यदि, क्षणाय तिष्ठति
तिष्ठति च एतैः सर्वैः धारितः
अथ स्फुटति लीयते च।
कदाचित् क्वचित् एवमपि भवति यत्
एकस्मै क्षणाय स्थिते बुद्बुदे
निमेषमात्रं स्वकरैः स्पर्शच्छुरणं विधत्ते रविः
तेन क्षणार्धं विरच्यते बुद्बुदान्तः
सप्तवर्णच्छवि इन्द्रधनुः।

कालस्य अजस्रोऽयं प्रवहति महानदः
अस्मिन् कैस्कैः संयोगैः

## समष्टिः

विनिर्मितः क्षणं समुत्थितः
बुद्बुद एकोऽहम्।
एकस्य मादृशस्य बुद्बुदस्य जनये
कति धाराधराः प्रवृष्टाः
कति कति धाराः स्यन्दिताः
बुद्बुदस्य कियती मात्रा?
क्षणभङ्गुरं तदीयं जीवनम्।
परमेकस्मिन् क्षणे मयि तिष्ठति
स्मयन्ते प्रसन्ना देवाः।
तेषां स्मितस्य सप्तवर्णच्छविषु
स्पन्दते ममान्तः
क्षणभङ्गुरं जीवनम् पुनरेकस्मै क्षणाय
परन्तु क्षणोSयं
कल्पसहस्राद् विशिष्यते ।

★★★

# शब्दालङ्कारः

आरुह्य शब्दनिःश्रेणीम्
प्राप्नोमि तं गवाक्षं
यस्मादनन्तं विलोकयामि।
दीपकाः प्रसारयन्ति
आलोकं
किञ्चिद्दूरम्
शब्ददीपका
विधृता अधिमानसदेहलीं
विद्योतयन्ति
अन्तर्विश्वं बहिर्विश्वं
शनैः शनैस्तेषां द्युतिः प्रसरति -
अभितः, परितः, निकषा, बहुदूरम्
आभूषणानि विभूषयन्ति कायम्
शब्दा अलङ्कारायन्ते
येभ्यो लभते संसारः
संस्कारम्।

★★★

# आकाशः

किं कुर्यादयमाकाशः?

वायुरिव स वातुं न शक्नोति,

अग्निरिव दग्धुं न प्रभवति

न जलमिवात्मानं धारासु विभक्तुम्

न क्षमा इव क्षमते भारं निर्वोढुम्

वायौ वरीवर्ति स्पर्शः

अग्नौ लसति रूपम्

जले आस्वाद्यते रसः

पृथिव्यां रमते गन्धः

परं किमस्ति आकाशे?

किमपि नास्तीत्यत एव तदीयमस्तित्वम्।

सोऽपि ईप्सति स्पर्शाय

सोऽपि स्पृहयते रूपाय

सोऽपि तातप्यते उष्णतायै

सोऽपि कामयते रसाय

गर्धते गन्धाय

स घटे घटे विशति

मठं मठं प्रविशति

तथापि नास्ति तस्य प्रत्यभिज्ञा

पण्डिताः प्रवदन्ति

घटाकाशो वा स्यात्

मठाकाशो वा स्यात्

आकाशः केवलमाकाश एव।

## समष्टिः

अभ्रङ्कषानां सौधसंहतीनां कान्तारे

स सम्भ्रमी बम्भ्रमीति

पिनष्टि एनं

संहतिः सौधानाम्

भीषयति एनं

धूमः उद्गारनलिकानाम्

आत्मनः आकाशं मार्गयते आकाशः

अपि नाम स्यात्

आकाशस्य कृते कुतोऽपि अवकाशः?

किं कुर्यादयमाकाशो वराकः?

★★★

# धरित्री

किं कुर्यादियं धरित्री?

अस्य सागरस्य किं कुर्यादेषा?

काममयं गभीरो विशालः
धरित्र्याः बृहत्तरो महाकृतिः
परन्तु अस्याः कृते तु
सर्वथा शिशुरेव
अयं अस्या चरणे लुठति स्म
फैनराशिभिर्विहसति स्म
साऽपि एनं क्रीडन्तं विलोक्य कथं प्रमुदिता बभौ
कवय आहुः
सागररशना धरित्री वरीवर्ति अस्माकम्।

क्वचित् क्वचित् कुसृतिततिं तनुते स्म सागरः
उपरि लहरीणां करौ प्रसार्य एनां स्पृष्टुं उत्तिष्ठति स्म कदाचित्
तथात्वेऽपि सा अस्य क्रीडां विलोक्य रज्यति स्म
सोऽपि अस्या स्पर्शमवाप्य हर्षातिरेकातन्नरीनृत्यति
क्वचित् क्वचित् अयं दुस्साहसमपि कुरुते स्म
धरित्र्याः पुत्रान् नाविकान् स निमज्जयति,
धरित्री विषण्णा विलोकयति
पोतान् लयं प्रयातान्।
परन्तु तदानीमपि एवं तु नाभूत्
यदयं सागरः दुर्दान्त दानव इव
शृङ्गान् तीक्ष्णीकुर्वन्नेनां निगिलितुं धावेत्

## समष्टिः

अयं तु असंस्तुतः सागरः
अदृष्टपूर्वमनया अस्य सागरस्य
एतादृशं विकरालं रूपम्
अस्य सागरस्य किं कुर्यादियं धरित्री?

★★★

# बीजानि

कानिचिद् बीजानि
कुशूलकोणे शिष्टानि
उत्कायन्ते स्म -
किमर्थं न वयं क्षिप्ताः कस्मिंश्चित् केदारे
कश्चिदस्मान् स्वहस्ते उत्थापयेद्
अस्मानपि उच्छाल्य उच्छाल्य वपेत् क्षेत्रे
वयमपि अङ्कुरायामहे, पल्लवायामहे, पत्रायामहे,
वयमपि शस्यनिवहे आत्मानं विकिरामः
भवामश्च पुनरपि बीजमेव।
तेषां स्वप्नाः दिवास्वप्नायिताः।

कच्चरचये क्षिप्तानि कानिचिद् बीजानि
तत्रैव उच्छ्रिलीन्ध्रायन्ते स्म
यावत् ते पश्येयुः कमपि स्वप्नम्
तावन्नगरपालिकाया कच्चरवाहनं
तान्युत्खाय निनाय।

कानिचित्तान्यपि आसन् बीजानि
येषां बीजत्वमेवापहृतं
प्रयोगशालासु
निर्वीर्यतां गतानि वन्ध्यानि तानि -

## समष्टिः

बीजायितुं काङ्क्षन्ते[1] स्म।

कठिना भवति

बीजभावापत्तिः

ततोऽप्यधिकतरं कठिनं

बीजस्याङ्कुरीभवनं

कठिनैव पुनरङ्कुरस्य शाखासु पल्लवेषु विस्तृतिः

वाञ्छति प्रत्येकं बीजं

अङ्कुरायितुं, पल्लवायितुं, शाखायितुम् शस्यायितुं

समेषां बीजानां कामास्तु न फलन्ति।

अथ तेषां बीजानां किं स्यात् -

यानि मनसः कोणे क्षिप्तानि अतिष्ठन्?

★★★

[1] आत्मनेपदप्रयोगे च्युतसंस्कृतिः, तत्तु न काङ्क्षे विजयं कृष्णेतिवददोषास्पदम्।

# शम्बूकाः

शम्बूकाः स्मो वयम्
शुक्तिरस्माकं कायः,
कायेऽस्मिन् लीनाः
विकटसङ्कटसङ्घाते
स्वकाये वयमन्तर्लीयामहे
मरणाद् विकरणादात्मानं रक्षन्तः।
शुक्तिकाभ्यन्तरं विद्यमानाः
वयमपारे सागरगह्वरे चरामः
मुक्ताः धारयामः
जानीमो वयं
यदा कायं स्वीयं
त्यक्त्वा यास्यामः
तदा शुक्तिका विचित्य नेष्यन्ति मानवाः
गवेषमाणा वेल्लिष्यन्ति
मुक्तास्तेषु
ताः शुक्तयः सन्ति अस्माकं शवाः।
शङ्खा अपि अस्माकमेव देहाः
त्यक्त्वैनान् देहान्
यदा यदा महाप्रयाणं कुर्मः
आदाय शुष्का अस्माकं कायाः
आस्फाल्य आध्माप्य  फूत्कृत्य फूत्कृत्य
गल्लौ विस्तार्य
निनादयन्ति
तान् मानवाः
येषु वयं न भवामः।

# शनैः शनैः

जीवनसरसस्तीरे निपीतोऽञ्जलिना रसः।।
याऽऽसीद् बलवती तृष्णा सा वै जीर्णा शनैः शनैः।

सौन्दर्यस्य लसच्छायाऽवतीर्णा मम मानसे।
मानसे च यथा सन्ध्याऽवतरेत् सा शनैः शनैः।

आकाङ्क्षामदिरां पीत्वा कृतं बहु गतागतम्।
क्षीबता किन्त्विदानीं सा क्षीणा क्षीणा शनैः शनैः।

प्रभाता रजनी मन्ये तमश्चान्धं निवर्तते।।
अवश्यायस्य राजिः सा सम्प्रकीर्णा शनैः शनैः।

झञ्झा मन्थरतां यायात् समुच्छवसेत् प्रभञ्जनः।
मनोरथस्य वल्गैषा मया कृष्टा शनैः शनैः।

त्वरयाऽवरया किं स्यात् किं वा स्याद् बहुधावनैः।
शैथिल्यस्य रुचिस्तन्वी मयि कीर्णा शनैः शनैः।।

आस्थायाः क्षेपणीं धृत्वा  सङ्कल्पस्योडुपे स्थितः।
दुस्तरा जीवननदी मया तीर्णा शनैः शनैः।।

यथा सर्पः स्वनिर्मोकं जीर्णं त्यक्त्वा नवं वहेत्।
हित्वा जीर्णत्वमात्मीयं नवं जाये शनैः शनैः।

★★★

# वार्धक्यम्

जरदष्टिं मा पृथिवी कृणोतु ।
अथर्ववेदे (12.21)
मया सह वार्धक्यमङ्गीकुरु
सर्वोत्कृष्टं इतोऽग्रे भावि
-- बायरनकवेः[2]

कायं क्राम्यन्तीभिर्वलिभिः सह
समतलतां यान्ति यदा
चिन्तावितानवलयाः
जीवनस्य व्याघातानाम्,
यदा पचेलिमैः श्वेतिमानं भजद्भिः कैशैः सार्धं
मार्ज्यते मनसः  कालुष्यसन्ततिः
मन्दायमाने नयनयोर्ज्योतिषि
यदा अन्तश्चक्षुषोरालोके
उन्मीलिता भवेत्
क्षणच्छविः
तेषां प्रस्थानपरीवर्तानाम् -
ये पृष्ठत उज्झिताः
यदा प्रत्यवभासेरन्
आसन्नानि प्रस्थानानि
यदा अक्षिलक्षीभवेत्
यद् भविष्यगर्भे निहितम् सर्वं तत्।

[2] Grow old along with me
the best is yet to be
--Byron

## समष्टिः

यदा कश्चन शिथिलैः मन्दैः पदक्षेपैः
प्रचलेद् आजीवनं सञ्चितस्य तपसः
सम्पदं करे धृत्वा
तदा विज्ञेयम् -
वृद्धः खल्वयं जातः

अभिशापो  नास्ति वार्धक्यं
सहजलभ्यमपि नैव वरीवर्ति वार्धक्यम्
विगतेऽप्यायुषि
वार्धक्यमप्राप्य तिष्ठन्ति बहवः।

ऋषयो मुनयो ज्ञानिनः
कामयमाना
स्पहयन्तो वार्धक्यं
यापयन्ति जीवनम्
कामं पण्डिताः कतिपये
पुष्णन्तस्तिष्ठन्ति
विवर्णतां गतं
मिथ्या यौवनम्।

अहो दुर्भाग्यं देवानां
यत्ते वृद्धाः भवितुमशक्ताः
सस्पृहम् अवलोकयन्ति
द्युलोकात्
मर्त्यलोकस्य तान् वृद्धान्
येषां दुर्बलेषु अंसेषु
ध्रियमाणा आस्ते

## समष्टिः

इयं धरा।

यक्षाणाम् अलकाया
अतिशेरते
अस्माकम् इयं पृथिवी
यस्यां वार्धक्यभावापत्तिः
अद्यापि सम्भावना वर्तते।

अपक्वानि फलानि पच्यन्ते
त्यजन्ति वृन्तं स्वं
यौवनवृन्तं त्यक्त्वा
मधुरतरं जायते जीवनफलं
वार्धक्ये स्वीये पर्यवसाने।

वृद्धस्यौष्ठे मृत्युः
अधरे लसति चामृतम्
उभयोर्मध्ये स्मितरेखा
तस्य जीवनम्।

यावान् वृद्धो भवति नरः
तावानेव शिशूयति
मृत्युर्मातेव तमेति
तमङ्के धृत्वा जिग्मिषति
कुत्र नयसि माम्? -
बालायितो वृद्धो मृत्युमातरं पृच्छति
अनन्तस्य महास्रोतसस्तटे
शिलान्ते अवस्थितो मृत्युः

## समष्टिः

तेन परिहसति --
अपि नाम निपातयामि अधः
अपि नाम निपातयानि?
इति वृद्धं पृच्छन्।
अपि नाम जानाति मृत्युः
यत् तस्य भुजबन्धनात् स्रस्त: स वृद्धः
अधो निपतन्
यस्मिन् अनन्तगह्वरे
निमज्जेत्,
स खलु अमृतसागरः?
मृत्युं सम्मुखं दृष्ट्वा
वृद्धः स्मयते
मृत्युस्तं पुरः क्वचित् गुप्तः क्वचित् प्रकटितश्छलितं नृत्यति
तस्य नर्तनं दर्शं दर्शं वृद्धः स्मयते।

अपि नाम एतदीयस्य स्मितस्य
समग्रामप्रतिमां भव्यतां धृत्वा
वृद्धोऽयं संस्थितः स्यात् --
तासां स्वस्यैव सन्ततीनां समक्षं
यास्तं बलात् वृद्धाश्रमं प्रापयितुमत्कायन्ते?
अपि नाम तदीया इमाः सन्ततयः
अवगच्छेयुः
यत् वृद्धस्य गेहे वर्तनं
नास्ति तासां कृते अभिशापः
अपितु अमृतसम्भृतानाम् आशिषां वर्षा आस्ते?

★★★

# प्रतीक्षारसः

आरात्रि सुखेन शयितम्
विच्छिद्यमाने तमसि
निद्रा भग्ना।
एकस्मै  क्षणाय प्रतीक्षमाण आसं
कदाचिन्निद्रा पुनर्मामुपसर्पेत्...
भग्नमात्रायां निद्रायां
दूरादेकाकिनः काकस्य
काकारटितं श्रुतम्,
कियत् कोमलो
मृदुलो नादोS यम्... काकस्य काकारवः
अयम् उषसि तथा मन्दं कूजति
यच्छ्रुण्वन् शिशयिषुः शेताम्
जिजागरिषुश्च जागर्तु
यथा काचन माता प्रभाते जागरणाय शिशुमाह्वयति,
यथा पितर आह्वयन्ति
उत्थानाय।

अद्य तु चायनिर्माणमपि अनन्यथैव जातम्
चमसः,
येन चायपत्राणि पातयामि
स्थाने मिलितः,
शर्करापि अन्यूनानतिरिक्ता

## समष्टिः

तावती एव शर्करा, तावदेव दुग्धं
यावत् प्रतिदिनं भवति
किन्तु चायं विशिष्य अस्वदत।

बहिर्वर्तते सघनस्तुषारः
वाहनं समयेन नागमिष्यति
मां विमानपत्तनं प्रापयितुं
इति मन आशङ्कते स्म।
परमाश्वसित्यपि स्म मनः -
विमानोड्डुयनान्यपि विलम्बितानि स्युरिति।

दरविलम्बेन टैक्सीयानमागतम्,
अहमचिन्तयम् - सघनतुषारे
वाहनं कथं चालयितुं शक्ष्यति चालकः
बहूनि वाहनानि मार्ग एव अवरुद्धानि
सघनतुषारे वाहनं चालयितुमसमर्थाः
चालकाः राजमार्गपार्श्वे वाहनानि स्वानि स्वानि स्थापयित्वा
तेषु सुप्यन्ति स्म
अहं विलम्बेन प्रचलन्
समयेन विमानपत्तनं प्राप्तः,
अन्तः प्रविष्टः
विमानानि तु समयेनैव चलन्ति स्म।
विलम्बः जातः, किञ्चित् प्रतीक्षा करणीयाS भूत्
कामं विलम्बेन
विमाने तु उपविष्टः
समयेन गामुकं विमानं
किञ्चिद् विलम्बनैव

प्रातिष्ठत्।

इदानीं सुस्थोऽस्मि
कामं विलम्बेनैव
धीर्मम बुद्धौ समेता
मनाग् विलम्बो जातः
किञ्चित् प्रतीक्षा करणीयाऽभूत्,
अस्मिन् विलम्बे
अस्यां च प्रतीक्षायां
रसो वसति स्म
स तु शिष्यते इदानीमपि।

★★★

# मालवी

सेवानिवृत्तेः सोपानसरणिम् अवरोहतः
धरित्रीं स्पृशतः स्म चरणौ
वानप्रस्थसंन्यासयोः सन्धौ अवस्थितस्य
मम मनसो नैकानि आवरणानि त्रुटितानि।

तदा
ब्रह्मसूत्रशाङ्करभाष्यस्य
पृथुलकायग्रन्थम्
अधः अवस्कन्ना
काव्यप्रकाशपुस्तकस्य पृष्ठतो –
यस्मिन् कस्मिन्नपि कोणे निलीना
मम अनवधानताया एकस्मिन् क्षणे
परावृत्ता अकस्मात् -
प्राप्ता मां मालवी।

यथा क्रौञ्चवधे जाते
कवेः शोकः
श्लोके स्फुटितः स्यात्
क्वचित् द्वित्राणि वाक्यानि मालव्यां
पत्न्या आलपतो मे वक्त्रात्
सहसैव समुद्गतानि

इदानीं चिन्तयामि
कः स

## समष्टिः

य एवमकस्मान्मालवीमस्फोरयत्
स विगतेषु षष्टिवर्षेषु क्व निलीन आसीत्?
अहं स्वाभ्यन्तरमवलोकयामि
तस्य प्रत्यभिज्ञायै।

★★★

# भवनस्य छदौ वाटिका

अतिलघुकं गृहम्,
तदुपरि लघु पटलम्
जलमपि अल्पम्
अस्मिन् अल्पीयसि सर्वस्मिन्
समावेशं यातो अल्पीयान् अनन्तः।
समुद्गकेषु करण्डेषु च पादपा रोपिताः
छदौ नन्दनकाननस्यावतारः स्यात्
इति तु दूर एव स्थिताऽभूत् कथा।

एते पटलोद्यानपादपाः सन्ति
अल्पेन तुष्यन्ति
अल्पेन रमन्ते
अल्पेन जलेन अल्पेन समीरसंसरणेन
अल्पेन सीकरेण प्रसन्ना भवन्ति
अल्पेन रमन्ते
एतान् स्नपयतु प्रेम्णा
एते शिशव इव हसेयुः
स्नपिताः अपेक्षया पश्यन्ति
यथा निगदन्तः स्युः - इतः परं किम्?
क्वचन वेल्लति बोगनवेलियालता
शिर उन्नमय्य दूरं पश्यति
अन्यमनस्का च ब्रूते स्व भ्रातॄन्
यत्र उत्तुङ्गानां
वज्रलेपघटितानां सौधानां काननं प्रसृतम्

## समष्टिः

तत्र सत्यं कान्तार आसीत्
तस्मिन् कान्तारे मम मातामही आसीत्
यदाहम् उत्पाट्य इह आनीता
तदा विषण्णा आसीत् सा
उच्छिन्ने कान्तारे सा क्व गता स्यात्
एकस्मिन् आवले वटवृक्षः
सम्पिण्डितो निकृत्तः
वामनतां नीतः
कष्टं समुच्छ्वसिति
तस्य कष्टं वीक्ष्य अन्ये पादपाः
स्मयमानास्तमीक्षन्ते
स सगर्वं ब्रूते - अरे किं पश्यथ
युष्माभिर्मम विराड् रूपं न दृष्टं
अस्मात् समुद्गकात् निष्कास्य कश्चिन्मां रोपयेत् --
उन्मुक्तायां भूमौ,
तदा अहं सर्वतः समुद्गतैर्मूलैःअभितः परितः प्रसरन्
एनं भवनानां कान्तारमेव ध्वंसयेयम्।

आवलेषु पादपाः मौनं स्थिताः
ते कुहूकारैर्न रज्यन्ते
यथा शासकीये विद्यालये
गुरोः दण्डात् भीताः
शिशवः सुखासने तूष्णीं स्थिताः।
गृहस्वामी चिन्तयति -
एतावता तु एतेभ्यो जलं दत्तम्
यदा नलेभ्यश्छदिं यावदुपरि जलं नागच्छेत्
ततः किं भविता?

★★★

# देवदीपावली

पुण्ये कार्तिकपूर्णिमोत्सवदिने काश्यां समायोज्यते
गङ्गारोधसि विश्वनाथनिलये सा देवदीपावली।
रिङ्गत्तुङ्गतरङ्गहस्तविधृतैर्दीपैरसंख्यैः शुभै-
र्गङ्गा यत्र करोति शङ्करमहादेवस्य नीराजनम्।।

दीपानां सरणिः सृता धृता च लहरीहस्तैः स्वयं गङ्गया
नीरेऽस्या अवतीर्णमस्ति नभसो नक्षत्रचक्रं नु किम्?।
आकाशं प्रविधाय मण्डपमहो रङ्गं च गङ्गातटं
लास्यं ताण्डवमद्य किं वितनुते देवोऽर्धनारीश्वरः।।

नीरे चन्द्रमरीचिभिर्विरचितं सेतुं क्वचिद् राजतं
दीपानां च ततिं तथैव परितो गङ्गातटे विस्तृताम्।
सङ्घट्टं च गतागतं च सलिले नौकासहस्रैः कृतं
निध्यायन्ति कुतूहलेन चकिताः पान्थाश्च वैदेशिकाः।।

**प्रक्षिप्तं च -**
केचिद् द्यूतपणेन वा मदिरया केचित्तु विस्फोटकै-
र्विद्युद्दीपविभावितानविलसद्विच्छित्तिभिश्चापरे।
अन्ये पूजनमङ्गलैः शुभधियः कुर्वन्तु दीपोत्सवं
स्वात्मा यैर्विहितस्तु दीपकचयस्ते नित्यदीपोत्सवाः।।

★★★

# प्रस्तरस्थले नगरे

पान्थ, नात्र स्रस्तरम् (शास्त्रम्) अस्ति मनाक्
प्रस्तरस्थले ग्रामे (*गाथासप्तशती- 873*)[3]

शास्त्राणां शय्यासु निविश्य
काव्यानां समस्तकेषु शयिताः
जना अत्र न दृश्यन्ते
प्रस्तरस्थले नगरे
सर्वं प्रस्तरायितम्।

प्रस्तरस्य उद्यानानि
प्रस्तरस्य प्रासादाः
प्रस्तरशरीराणि
प्रस्तरस्य मनांसि

प्रस्तर इव अहङ्कारः
यत्र गम्यते तत्र प्रस्तराः
प्रतिमानिर्माणाय स्थापिताः
प्रस्तराणां निचयाः
प्रस्तराणां प्रतिमाः
प्रस्तराणां समाधयः
प्रस्तरायितानि मनांसि
प्रस्तरायिता बुद्धिः
प्रस्तरनिचये

---

[3] पंथअ, ण एत्थ संथरमत्थि मणं पत्थरत्थले गामे। इति प्राकृतमूलम्

## समष्टिः

क्रन्दन्ती पृथिवी।
पृथिव्याः तनौ
प्रस्तरान् क्षिपन्तो जनाः।
या धरित्री
अतिविकटविस्तृतपर्वतशिखरोत्तुङ्गभूमीरुहाणां भारेण
न क्लिन्ना
तस्याः कृते कथमत्र एकैकः प्रस्तरो भारायते।
हे मातर्भूमे,
प्रस्तरैस्तव कोमला तनुः
क्षतिं च विक्षतिं च नीताऽ स्माभिः
एतस्य पापस्य कृते मर्षय नः
इति भावनया अपराधक्षमापणस्तोत्रं
ये विरचयेयुस्ते कवयोऽ पि सम्प्रति न सन्ति।
अस्माकं तु
प्रस्तरायिताः
शब्दा अपि ।

★★★

# देहल्यां मेट्रोयाने – दृश्यचतुष्टयी

***(प्रथमदृश्यम्)***

*(अस्य दृश्यस्य जवनिकापसारणम् विंशशताब्द्याः अवसानकाले कस्याञ्चित् तिथौ भवति)*

अहं कौतुकवशात् चित्तरञ्जनाय एव मेट्रोयाने प्रविष्टः
सुचिक्कणं नवीनं यानम्
सर्वं रमणीयं नवीनं भव्यम्
विश्वस्मिन् विश्वे क्वचिदेव लभ्येत
एतादृशी मेट्रोवाहनव्यवस्था
इति गर्वमनुभवन्
अहं सुखेन आसन उपविष्टः
भूयो भूयो धन्यवादान् व्याहरामि स्म मनसि
श्रीधरन्वर्याय मेट्रोमानुषाय
यस्य प्रसादात् मेट्रोयाने उपविश्य
अनुभवामो वयम् -
पेरिसे वर्तामह उत वियनायाम् इति।
अथ च स्वशिरांसि उन्नामयामः ....

***(द्वितीयं दृश्यम्)***

*(अस्य दृश्यस्य जवनिकापसारणम् एकविंशशताब्द्याः प्रथमे दशके कस्याञ्चित् तिथौ भवति )*

मेट्रोयाने सर्वं सुखावहम्
गमनागमनं पूर्वतोऽधिकं,
तथापि जनसम्मर्दो नास्ति।

## समष्टिः

देहल्याः परिपुष्टाः स्वस्था युवानः युवत्यश्च
आसनेषु उपविष्टाः
प्रविष्टे मयि
वरिष्ठनागरिकेभ्य आरक्षित आसने उपविष्टः
कश्चन युवा सादरमुत्थाय
उपविशत्वङ्कल इत्युदीर्य
मह्यं आसनं ददौ।
अहं सुखेनोपविष्टः।

### *(तृतीयं दृश्यम्)*

*अस्य दृश्यस्य जवनिकापसारणम् एकविंशशताब्द्याः द्वितीये दशके कस्याञ्चित् तिथौ भवति)*

अतितरां जनसम्मर्दसङ्कुले
विघट्यमानेषु अंसेषु
प्रविष्टोऽS हम्
मेट्रोयाने।
युवानः चलदूरवाणीषु संसक्ताः
आसनानि स्वायत्तीकृत्य उपविष्टाः
वरिष्ठनागरिकाणां कृते आरक्षिते आसने उपविष्टं
युवानमहमपेक्षया पश्यामि
स मयि उपेक्षया त्वरितां दृष्टिं निपात्य
चलदूरवाण्यां मुखं निमज्जयति
अहं वीतराग इव तिष्ठामि....

### *(चतुर्थं दृश्यम्)*

*(अस्य दृश्यस्य जवनिकापसारणं भविष्यत्काले एकविंशशताब्द्याः तृतीये दशके कस्याञ्चित् तिथौ भविष्यति)*

## समष्टिः

प्रायः प्रवेशावसरो नास्ति
मादृशस्य वृद्धस्य कृते
तथापि गन्तव्यं तु वर्तत एव
कथञ्चित् विघट्यमानेषु अंसेषु
स्थगितः प्रेरितः एतस्ततो नीतः विनीतः
अहं यानखण्डके प्रविष्ट एव
चलदूरवाण्यामासक्ताः
युवानः
मां दृष्ट्वा हसन्ति
तेषु एक आह
अरे अयं वृद्ध
एतावतापि जीवति
कियत् कालमयं भारभूतस्तिष्ठेत्...

★★★

# वटतरुः

राजमार्गस्य पार्श्वे वटतरुरयमेकाकी तिष्ठति
पूर्वं बहवो वृक्षा आसन्
अभितः परितो निकषा एनम्
सघनं परिवार्य संस्थिताः
तदीया बन्धुजना इव

एकैकशस्ते तं विहाय गताः
राजमार्गस्य विस्तारयोजनायाः क्रियान्वयनकाले
दृष्टस्तेन तेषां स्वबन्धुजनानां निर्घृणो वधः।
हृदि प्रस्तरं निधाय।

नगरेऽस्मिन् इतिहासविशारदो मम मित्रं कश्चन निवसति
स एतस्य वटतरोरैतिह्यमित्थं विशदयति -
वटतरुरयं पुरा सहस्रशीर्षा सहस्राक्षः सहस्रचरणः सहस्रबाहुः पुरुष इव बभूव
सहस्रं जनानां कृते सभागारं
स्वच्छस्वच्छायायामयं रचयति स्म,
कदाचिद् ग्रामीणाः
अस्य च्छायायाम् उपविश्य
जल्पन्ति परस्परं, कथाः कथयन्ति चर्चरीं वा गायन्ति
अयं च शृणुते,
जल्पानां कथानां गीतानां च श्रवणलोभेन
देवा अपि क्वचिदवतीर्य
अस्य शाखासु निलीनास्तिष्ठन्ति स्म

**समष्टिः**

दूरादश्रूयन्त
फेरवाणां घूङ्कारवाः
भल्लूकानां थूत्कारध्वनयः
मयूराणामाकुलाः केकाः
कोकिलानां काकलयः
उलूकानां घूत्काराः
अथवा पर्वतानां वक्षांसि विदारयन्तः
गजानां चीत्काराःसिंहानां गर्जनध्वनयो वा
वस्तुतस्ते पक्षिणः पशवः
ग्रामजनानां कथासु ओमिति कथनं कुर्वन्ति स्म
अथवा तेषां गाने
मृदङ्गमार्जनाभिः
मञ्जीरशिञ्जितैर्वा
सङ्गतिं समाचरन्ति स्म।

अथ कदाचित् कश्चिन्महान् गायकः
राजसभाया अकारणाविष्कृतवैरदारुणैः खलैर्निर्वासित
इहागत्य मुहूर्तं विश्रान्तः
अस्यैव वटतरोश्छायायामुपविश्य
भैरवरागमगायत्
तदानीमस्य शाखासु
सहस्रं वीणाः प्रादुर्भूताः,
वटश्चायं
रागस्य सङ्गतौ
ताः सहस्रवीणा वादयन्
दशसहस्रशाखाबाहून् कम्पयन्
आन्दोलितो बभूव

## समष्टिः

अद्भुतं दृश्यमिदमवलोकयितुं
द्युलोकादन्तरिक्षं यावदागता देवाः
पुष्पाणि वर्षन्ति स्म।
उषसि अहमेतेन मार्गेण क्वचिद्भ्रमणाय यामि
वटतरुमेनं धूलिधूसरं निर्विण्णं च विलोकयामि।
तरुष्वपि स्मृतिर्भवति
इति केचन सम्प्रति मन्यन्ते
अपि नाम स्मरन् स्याद् वटतरुरयम्
पूर्वं परितःप्रसृतानां वृक्षाणां..... स्वबन्धूनाम्?
पूर्वमेनं कलचुङ्कृतिभिः गुञ्जयतां विहगानाम्?
तेषां श्वापदानां
ये अस्य परिसरे अनदन्?
तस्य गायकस्य वा
यदीयगानसङ्गतौ
अनेन वीणासहस्रं वादितम्?

ताः कथा येन इतिहासविदा मित्रेण कथिताः
स एव सम्प्रति कथावशेषतां यातः।

अत्र कदाचित् पुरा गहनः कान्तारः स्यात्
सम्प्रति काङ्क्रीटकान्तारः प्रसरीसर्ति
सम्प्रति अत्र फेरवा रवान् न कुर्वन्ति,
भल्लूकानां थूत्कृतयो न सरन्ति,
न श्रूयन्ते मयूराणाम् आकुलाः केकाध्वनयः
कोकिलानां काकल्यः श्रवणेऽ मृतं न निषिञ्चन्ति,
उलूकानां घूत्कारास्तु विच्छिन्नाभ्रविलायं विलीनाः,
पर्वतानां वक्षांसि विदारयन्तो

**समष्टिः**

न गुञ्जन्ति गजानां चीत्काराः, सिंहानां गर्जनध्वनयो वा
तेषां स्थाने
सायरनस्वराः
वाहनानाम् इञ्जिननादाः कर्णकुहरं विदारयन्ति।

अधुना नास्ति कापि आशा
यदेनं वटवृक्षं परितः
मुग्धाः पादपशिशवो
हसिष्यन्ति,
किलकिलां करिष्यन्ति
पुष्पाणि;
स्मयिष्यन्ते किसलयाः।
कियान् कालो जातः
यदनेन पुष्पाणि न दृष्टानि
स स्वयं पुष्पायितः स्यात्
इति तु आशैव दुराशा वर्तते।
पुष्पाणां तु कथैव दूरे आस्ताम्
इदानीं नवपल्लवसम्भारा अपि
नैतस्मिन् रोहन्ति
पुराणजीर्णानि पत्राणि अस्य
सन्ति यद्यपि तथाविधान्येव।

न केवलम्
वटवृक्षमिमं परितः प्रसृतं
गहनं वनं विलुप्तम्,
ता वनग्रामटिका अपि लोपं याताः
याभ्यः समेत्य

## समष्टिः

ग्रामीणा जल्पन्ति स्म परस्परं, कथाः कथयन्ति स्म
चर्चरीं वा गायन्ति स्म।

गतास्ते पक्षिणः
ये अस्य सहस्रशाखासु सायं समेत्य
स्वीयैः कलचुङ्कृतिभिः
सहस्रतन्त्रीर्वीणा इह झङ्कारयन्ति स्म।
तेषां नितरां दीनानां तपस्विनामेव कार्मण्यमिदमासीत्
यदयं वटवृक्षः किंवदन्तीवृक्षः कदाचित् सञ्जातः।
इदानीं ताः किंवदन्त्योऽपि
शुष्कपत्राणीव निपतिताः
तासां मर्मरध्वनिरपि
न श्रूयते सम्प्रति।
सम्प्रति किंवदन्तीरहितः
एकाकी तिष्ठति
अयं वटवृक्षः।

एकदा
कश्चन नेता
वटतरुमेनं निकषा चत्वरे सामूहिकसभायां समागतः
भाषणं कृतवान्
अरे पश्यन्तु
एनं वटवृक्षं परितो न किमपि रोहति
यतो ह्ययं तु शोषकः
केवलमात्मन एव पोषकः
एतादृशानां वटवृक्षाणां नाशः करणीयः
पश्यन्तु कियत् स्थानमनेन वृथापुष्टेन हस्तितम्

## समष्टिः

अस्मिन् स्थाने अस्माकं प्रियनेतुः
श्रीमतः शीकामुरामहोदयस्य प्रतिमा स्यात्!
वटतरुर्मूकः खिन्नश्च सर्वं शृणुते
इति मे प्रतीयाय।

नेता तु भाषणं कृत्वा
मन्त्रिमण्डलस्य उपवेशनमाहूतवान्
वटतरुं निकृत्य तस्य स्थाने
शीकामुरामहोदयस्य प्रतिमा स्थाप्येति प्रस्तावः
तत्र अङ्गीकृतः,
अथ अपरे एनं प्रस्तावं न सेहिरे
ते उच्चन्यायालये याचिकां ददुः
प्रतिमास्थापना स्थगिता भवत्विति।
उच्चन्यायालयेन च स्थगनादेशोऽदीयत।

अथ प्रभाते वृत्तपत्रे
शीकामुरामहोदयस्य  प्रतिमास्थापनस्थगनवार्ता मया पठिता
अनन्तरं च प्रातर्भ्रमणाय विनिर्गतः
मया दृष्टं वटवृक्षो
विहसति।

★★★

# नारिकेलम्

एकोऽसौ प्रबभूव नैकविटपो यो नारिकेलद्रुमः
काचिच्छ्रेष्ठफलप्रसूतिरनघा देवालयेऽस्यार्पिता।
हस्ताद्धस्तमियं तथैव च गता देवप्रसादायिता
युक्ताऽन्यापि च मङ्गले परिणये सत्कार्यकार्येऽथवा।।
तन्तूनामपरा प्रदीर्घततिभी रज्जूयते गुम्फिता
साऽग्नौ प्रज्ज्वलति प्रदत्तहविषा त्वन्या तथैवेन्धनैः।
देशाद् देशमथापि राशिवितता यानैश्च पोतैस्तथा
नीताऽन्या क्व गता क्व लोपमयितेत्येवं न जानीमहे।।
पिष्टाऽन्या किल निर्दयं च कृपणैस्तैलस्य निर्यासने
नीताऽन्धे तमसीव रम्यवनिताधम्मिल्लजालेऽपतत्।
निष्ठ्यूता त्वपरा विलासमदिरानिःश्च्योतनार्थं पुन-
र्भक्ष्यं स्वादु बभूव काऽपि सरसा त्वन्या च लेह्यायिता।।
तृष्णार्तैरपरा पुनश्च नितरां घर्मे च शुष्काधरैः
काचिच्छीतरसप्रपाणकविधौ स्वेदाञ्चितैश्चुम्बिता।
भुक्ता चाथ तिरस्कृताऽपि बहुशः सर्वैस्तथोपेक्षिता
प्रक्षिप्ता पतिता पुनः क्वचिदहो वीथीषु शेतेऽन्यथा।।

★★★

# अधोगमनम्

भरतेन पाठिताः शतं शिष्याः
कस्यचित्त्वथ कालस्य
ग्राम्यधर्मकं शिल्पकं कर्तुमारेभिरे।
शिल्पकं तत्
ऋषीणां व्यङ्गकरणं
दुराचारं ग्राम्यधर्मप्रवर्तितं
निष्ठुरं चाप्रस्तुतं चाभवत्।
अरे अरे अस्माकमयमुपहासः
अस्माभिः तपस्तप्तं
तस्यायं विपाकः -
इति निगदन्तो भीमरोषप्रकम्पिताः।
ऊचुस्तान् भरतान् क्रुद्धा निर्दहन्त इवाग्नयो मुनयः--
अपि नाम युक्तमिदम्
अस्माकमेतादृशं विडम्बनम्?
एतन्न सहामहे
यूयं व्रात्या भविष्यथ
विना होमैः शूद्राचारा भविष्यथ
अपाङ्क्तेयाः कुत्सिता भविष्यथ।।
एतच्छ्रुत्वा वचनं मुनीनां
विषण्णा भरतपुत्रा पितरं समुपस्थिताः
प्रोक्तवन्तश्च तम् -
अहो नाशिता वयं त्वया
अनेन नाट्यदोषेण शूद्रायिता वयम्
भरत आह --

**समष्टिः**

अरे मुग्धाः!

नायं शापः

अयं नाट्यस्य समस्ते उर्वीतले प्रसारस्य अवसरः

तस्यादेशेन नटा

हिमालयादधो याताः

एवमुर्वीतले नाट्यं शिष्यै: समवतारितम्।

भरतानां च वंशोऽयं भविष्यं च प्रवर्तितम्।।[4]

★★★

[4] नाट्यशास्त्रस्य अन्तिमम् अध्यायमनुसरति कवितेयम्। अन्तिमे द्वे पङ्क्ती नाट्यशास्त्रदेवोद्धृते।

# अनिद्रा

अनिद्रा मां भृशं बाधते स्म
पूतनेव मां क्रोडे धृत्वा
सा विषाक्तं स्तनं न्यस्यति मन्मुखे
सा मरुःस्थलं रचयति
यस्य निरवधौ विस्तारे
पिपासितोऽहं धावामि
कुलटेव कुवचनैर्मां कवलं कवलं सा निगिलति स्म तदानीम्।
इदानीमनिद्रया अहं विहरामि
सा विहसन्ती मयि रमते
निद्रा दूरं स्थिता पश्यति।
कूलङ्कषोऽहं नदः
निद्रा च अनिद्रा च उभे तट्यौ
आप्लावयन् प्रवहामि
स्पृहयत उभे तट्यौ
मया सह प्रवाहाय।

★★★

# संस्कृतस्य अगाधे सरसि

संस्कृतम्
अगाधो ह्रदः
अहं तत्र
कश्चन लघुमत्स्यः
यदा कदाचित्
उन्नमय्य तुण्डं जलतलात्
उन्मुक्तम् आकाशम्
अपि विलोकयामि।

संस्कृतस्य अगाधादस्मात् सरोवरात्
सृताः नद्यः
बह्व्यो विलीनाः
सरोवरस्तु इदानीमपि यथापूर्वमवस्थितः।

संस्कृतस्य अगाधे सरसि
अवरुद्धः प्रवाहः
क्वचिद् उत्तिष्ठते शीर्णो दुर्गन्धः
केचन अस्य सरोवरस्य तटे
स्थिताः
गणयन्ति शास्त्रविवर्तान्
केचन मापयन्ति अस्य गहनताम्
केचन उत्तानं मुखं कृत्वा
अनवलोक्य सरोवरं

## समष्टिः

सरोवरविषये कुर्वन्ति प्रवचनम्।

अपरे लग्नाः
मुहूर्तगवेषणे
श्रीसत्यनारायणकथावाचने
तानसौ दुर्गन्धो न प्रतिभाति।

★★★

# कोकिलः

एषु दिनेषु
कोकिलो व्याकुलो वरीवर्ति,
कदा कुहूकारः कर्तव्य इति स न जानाति
पूर्वैः सूरिभिः कृताः सर्वा व्यवस्था अनेन हतकेन
सम्प्रति विपर्यासं नीताः
यदा वसन्तस्य किमपि नामावशेषो न स्यात्
तदा अयं कूजति
तीक्ष्णं कूजति
कर्णकुहरं विदारयेदिति कूजति
अस्य पञ्चमः स्खलितः
धैवते निषादे च निपत्य
विस्वरायित इत्यपि
नायमवधत्ते
न केवलमेतावदेव,
अतिवसन्ते कालेपि
दुष्टोऽयं कूजति
अपि नाम गतस्य वसन्तस्य
गायति शोकगीतिम्?
स्यात् एतस्य स्वरे कदाचिन्माधुर्यम्
भवेयुः पुराऽस्य काकलीगाने विशेषाः
इदानीं तु एतस्य ताने सन्ति उत्ताना अभियोगाः
प्रतिभान्ति उत्प्रासाः
कश्चन पृच्छेदेनम्

## समष्टिः

किमर्थं कूजसि एवं स्थिते
यदा स्थितयस्तव वशातिगाः?
इयमपरैव विडम्बना -
यत् समायाते वसन्ते
यदा अनेन कूजितव्यं
तदा अयम् अधोमुखः
स्त्रस्तगात्रः
तस्य आम्रस्य शाखायां तूष्णीम् उपविष्टः।

★★★

# पण्डितस्य आधुनिकस्य च संवादः

**पण्डितं प्रति आधुनिकः**

पीतं पाणिनिशास्त्रं प्रातिशाख्यमपि तथा निगीर्णं वै।
पण्डितपुङ्गव वद रे प्रेम्णो जानासि किं नु व्याकरणम्।।
सृष्टिरहस्यं ज्ञातं तन्त्रयुक्तयस्तथैव सुचर्चिताः।
वेदान्तं कण्ठस्थीकृतवानसि च समग्रमेव।
ननु जानीषे न्यायं सांख्यं तथा च मतानि सर्वाण्यपि।
अपि तां वा जानीषे सीदति गृहिणी गृहे तव या ।।

**पण्डितस्योत्तरम्**

मा वह गर्वमखर्वं रे रे आधुनिक पण्डितम्मन्य।
रिक्तस्त्वं ननु निर्जलघट इव तु निनाद्यसे मुखेन।।
उच्छृंखलता खलता खलु ते खल निसर्गतः सुप्रथिता।
स्नेहं मुक्त्वा खलतां तिल इव पीडनवशात् प्रयासि।
मम गृहिणीविषये यद् यद्वा तद्वा त्वया बहु निगदितम् ।
अपि पश्यसि निजदारान् शीलविदारणपरान् नु सदा।
संसारो यः परितो मामिह सुतरां च सन्ततं सरति।
शास्त्रदृशा तं सम्यक् पश्यन् विशदं चराम्यभयः।।
उपनेत्रं यन्नेत्रे धत्से तस्मात् कथं नु शङ्कयाः।
द्रष्टुं सत्यं तत्त्वं मार्जय नयने ननु प्रथमं त्वम्।

# मुस्ताक्षतिः[5]

किं किं किं करणीयमत्र खलु नः संसारचिन्ताकुलैः
किङ्कर्तव्यविमूढतां खलु गतैस्तैर्वा जनैः साम्प्रतम्।
लोकस्योद्धरणं तथा न खलु नो व्यूढो भरो वर्तते
सन्तुष्टा रचयाम शूकरवरा मुस्ताक्षतिं पल्वले।।
किं तस्य स्मरणेन यः कृतयुगे चासीत्तु नः पूर्वजः
येनेयं धरणी रसातलगता सून्नायिता चोद्धृता।
राज्ये पङ्कसमाकुले वयमहो तुण्डं निवेश्य स्वकं
सन्तुष्टा रचयाम शूकरवरा मुस्ताक्षतिं पल्वले।।
आकाशः स्फुटितः पतेदथ धरापृष्ठे धरा सागरे
मज्जेद्वा, विलयं प्रयान्तु विपुलाः सर्वे सरित्सागराः।
किं नश्छिन्नमनेन कालकवलं यायात् समस्तं जगत्
विश्रब्धं रचयाम शूकरवरा मुस्ताक्षतिं पल्वले।।

★★★

[5] कालिदासस्य "विश्रब्धं क्रियतां वराहततिभिर्मुस्ताक्षतिः पल्वले" इति पङ्क्तौ मम्मटेन विहिते "विश्रब्धं रचयन्तु शूकरवरा मुस्ताक्षतिं पल्वले" इति संशोधनस्य अन्तिमपदद्वये समस्यापूर्तिः।

# न खलु तद्वाच्यम्[6]

त्रासो यो वरयातृभिः बहु कृतः कोलाहलाडम्बरैः
यत् सम्बन्धिभिरर्थगृध्नुभिरहो याच्ञा कृता शम्बरैः ।
द्रक्ष्यामस्तनयां तवापि सधमत्कारं च यद् भाषितं
प्रस्थानावसरे च तैर्न खलु तद्वाच्यं वधूबन्धुभिः।।

उत्खातप्रतिरोप्यमाणलतिकातुल्या वधूर्नीयते
आतङ्काकुलितं मनो बहु भयं चास्या भृशं लिम्पति।
आशङ्का हृदये तथा बहुविधा लग्नैतदीये पुन-
स्तन्मातुः करुणं वचो- न खलु तद्वाच्यं वधूबन्धुभिः।।

रक्षन्ती निजगौरवेण सहजं साऽत्मानमेवात्मना
जीवेत् तत्र चिरं गृहे स्वश्वसुरस्यैषा हि नो जीवितम्।
उक्त्वैतावदतः परं यदि वचो जिह्वां क्वचिद् वा स्पृशे-
द्धन्तव्यं स्वमनो, परं न खलु तद्वाच्यं वधूबन्धुभिः।। ।।

★★★

[6] कालिदासस्य अभिज्ञानशाकुन्तले कण्वोक्तेः समस्यापूर्तिः।

# वयम्

आज्ञापालनमात्रनष्टविभवा
नो ते वयं किङ्कराः
ये नृत्यन्ति निरर्थकं तव कृते
नो ते वयं किन्नराः।
ये कूर्दन्ति च रञ्जितुं तव मनो
न स्मो वयं वानराः
ये जीवन्ति सदैव मानसहितं
राजन् वयं ते नराः।।

★★★

# चायपानकाले

पायं पायमिमं कषायमधुरं चायं मुहुश्चूषितैः
स्वच्छन्दं प्रतिचूषकं नवनवः सञ्जायते वै रसः।
अस्मिन् वै प्रतिबिम्बितास्तु चषके ते प्रोन्नताः पर्वता-
श्चायोद्यानहरीतिमा स सघनश्चोपपत्यकाविस्तृतः।।

आसामेषु च सिक्किमेषु च तथा वै दार्जिलिङ्गेऽथवा
धृत्वा पृष्ठकरण्डकं द्रुततरं सञ्चालयन्त्या करम्।
चिन्वन्त्या विहितः श्रमः खलु तया यः पत्रलाव्या गुरुः
तस्याप्येष नु मिश्रितोस्ति चषके गन्धः कषायः प्रियः।।

★★★

# हेमबर्गे हिमपातः

आप्रातरारात्रि हिमस्य वर्षा
सञ्जायतेऽस्मिन् ननु हेमबर्गे।
आलम्बितं तन्नभसो धरित्रीं
यावत् सितं कान्तिमयं वितानम्।।

तारैरनन्तैः प्रविभासमानैः
किं वर्षति व्योम च रत्नराशिम्।
दत्तं धरायै परिधानमाहो
ज्योत्स्नामयैर्वा बहुभिर्दुकूलैः।।

एते नभस्तो हिमराशिपुञ्जा
पतन्ति शुभ्राच्छछविं दधानाः।
आकाशपिञ्जापकपिञ्ज्यमाना
तूलस्य लेशा इव सन्तरन्ति।।

कासच्छविं सागरफेनराशिं
न्यक्कृत्य शङ्खस्य तथैव कान्तिम्।
हिमस्य शोभा वितता धरायां
स्तब्धा यथा काऽपि च दुग्धकुल्या।।

मार्गेषु रथ्यासु च वाहनेषु
वीथीषु पद्यासु विमर्द्यमानः
रराजते राजतरूपराशी
राशीकृतश्चाप्यसार्यमाणः।।

शाखासु शाखासु तथा द्रुमाणां
हिमस्य पुष्पाणि यथोद्गतानि।
संश्लिष्टपर्णान्यथ धारयन्ति
विलम्बिमुक्ताफलहारशोभाम्।।

## समष्टिः

अम्लानमालाः सितपङ्कजानां
मार्गेषु चालङ्करणाय दत्ताः।
धारा सुधाया वितता धरायां
धावल्यपूरैः पिदधाति नेत्रम्।

वर्णागमो वर्णविपर्ययश्च
वर्णे विकारश्च तथा प्रणाशः।
अन्यत्र सर्वत्र विलोक्यते वै,
हिमस्य वर्णस्तु सदैव शुभ्रः।।

★★★

# आतपस्य कोटयः

आतपस्य भवन्ति नानाकोटयः
कवोष्ण आतपः
पाटलपुष्पाभ आतपः
आर्द्र आतपः
तीक्ष्ण आतपः
गात्रसंवाहको मृदुरातपः

आतपस्य भवन्ति नानावर्णाः
स्वर्मिम आतपः
हरिद्राभ आतपः
हरित आतपः

अस्थिच्छेदकं शीतं सहमानस्य
दरिद्रस्य काये उष्णतामाधातुं
सघनतुषारकुज्झटिकां भित्वा
बहिरागन्तुम् आकुल आतपः...

★★★

# स्नुही

न सन्ति निम्बाश्वत्थवटादयो महातरवः
देवदारूणामत्र कथैव का
परितो दूरं यावत्
दन्दह्यमानो घर्मः
मरुश्च निगिलन्निव सर्वम्।
सुरसैव मुखं व्यादाय प्रसरता मरुणा
आस्ते च
इयमेकाकिनी युध्यन्ती
स्नुही।

★★★

# नवा नायिका

न सा निर्वर्णयति स्वकीयं रूपं
दर्पणे
चिरम्
उपभोगचिह्नानि
नखक्षतानि दन्तक्षतानि विलोकयन्ती।
उपनेत्रं धृत्वा
दैनन्दिन्यामङ्कयति
रजकस्य देयम्, दुग्धस्य देयम्

नित्यं पूर्णिमाया प्रकाश
न निस्सरति तस्या वदनात्
सा रसवत्यां
सततं कर्मव्यग्रा
अन्तर्गतमन्धकारं
निरस्यति स्वयं स्वकीयम्
सा सञ्चारिणी दीपशिखा नास्ति
वरमालां धृत्वा यं यं व्यत्यैतु
स स विवर्णभावं यातु
सा रात्रैः पर्यायं समाप्य स्वयमेव विवर्णमुखी निस्सरति
कस्माच्चिद् आह्वानकेन्द्रात्
तया साकमपि तन्न घटेत
यस्य वार्ताभिः पूरितानि भवन्ति दैनन्दिनवार्तापत्राणि
इत्याशङ्कमाना
मनोदीपे ज्योतिर्ज्वलति च तदीये किमपि तत्।

★★★

# नूतनवर्षमङ्गलम्

निर्गच्छंस्त्रपयाSवनम्रवदनः संवत्सरः प्राक्तनः
दित्सन् दायमुवाच खिन्नमनसा चागन्तुकं वत्सरम्।
ऊढो यो मनुजस्य पापनिचयैर्लिप्तो भृशं दुर्वहो
भारोS यं ननु वत्स वत्सर तव स्कन्धे समारोप्यते।।

दम्भोलिप्रखरैः खरैर्नृपशुभिः क्रूरैस्तथा दारुणै-
र्हन्यन्ते च बलात्कृताः प्रतिदिनं कन्यास्तथा चाबलाः।।
क्रव्याद्भिः प्रविलुप्यतेS ङ्गलतिका मातुर्हठान्निर्घृणं
येन श्वापदसङ्कुलेयमवनी सञ्जायते सर्वथा।।

एनां रक्ष च मानय स्वजननीस्तन्यस्य लज्जां तथा
शूलारोपणमेव तान् गमय ये लुण्टन्ति शीलं स्त्रियाम्।
इत्थं वृद्धजनेन खेदसहितं बालो यथा बोधितः
सोS यं नूतनवत्सरोSत्र वनिताक्षेमाय सञ्जायताम्।।

★★★